# .. kUrmastotram ..

# ॥ कूर्मस्तोत्रम् ॥

## Document Information

Text title : kUrmastotram

File name : kUrmastotram.itx

Location : doc_vishhnu

Author : Maharshi Vyas in Bhagavat Purana

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, NA

Description-comments : From Bhagavatapurana, 3.05.38-3.05.50

Latest update : July 7, 2012

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ કૂર્મસ્તોત્રમ્ ॥

શ્રી ગણેશાય નમઃ ॥ દેવા ઊચુઃ ॥

નમામ તે દેવ પદારવિન્દં પ્રપન્નતાપોપશમાતપત્રમ્ ।
યન્મૂલકેતા યતયોઽઞ્જસોરુસંસારદુઃખં બહિરુત્ક્ષિપન્તિ ॥ ૧॥

ધાતર્યદસ્મિન્ભવ ઈશ જીવાસ્તાપત્રયેણોપહતા ન શર્મ ।
આત્મઁલભન્તે ભગવંસ્તવાઙ્ઘ્રિચ્છાયાં સવિદ્યામત આશ્રયેમ ॥ ૨॥

માર્ગન્તિ યત્તે મુખપદ્મનીડૈશ્છન્દઃસુપર્ણૈરૃષયો વિવિક્તે ।
યસ્યાઘમર્ષોદસરિદ્વરાયાઃ પદં પદં તીર્થપદઃ પ્રપન્નાઃ ॥ ૩ ॥

યચ્છ્રદ્ધયા શ્રુતવત્યાં ચ ભક્ત્યા સંમૃજ્યમાને હૃદયેઽવધાય ।
જ્ઞાનેન વૈરાગ્યબલેન ધીરા વ્રજેમ તત્તેઽઙ્ઘ્રિસરોજપીઠમ્ ॥ ૪॥

વિશ્વસ્ય જન્મસ્થિતિસંયમાર્થે કૃતાવતારસ્ય પદામ્બુજં તે ।
વ્રજેમ સર્વે શરણં યદીશ સ્મૃતં પ્રયચ્છત્યભયં સ્વપુંસામ્ ॥ ૫॥

યત્સાનુબન્ધેઽસતિ દેહગેહે મમાહમિત્યૂઢદુરાગ્રહાણામ્ ।
પુંસાં સુદૂરં વસતોઽપિ પુર્યાં ભજેમ તત્તે ભગવન્પદાબ્જમ્ ॥ ૬॥

તાન્વા અસદ્વૃત્તિભિરક્ષિભિર્યે પરાહૃતાન્તર્મનસઃ પરેશ ।
અથો ન પશ્યન્ત્યુરુગાય નૂનં યે તે પદન્યાસવિલાસલક્ષ્મ્યાઃ ॥ ૭॥

પાનેન તે દેવ કથાસુધાયાઃ પ્રવૃદ્ધભક્ત્યા વિશદાશયા યે ।
વૈરાગ્યસારં પ્રતિલભ્ય બોધં યથાઞ્જસાન્વીયુરકુણ્ઠધિષ્ણ્યમ્ ॥ ૮॥

તથાપરે ચાત્મસમાધિયોગબલેન જિત્વા પ્રકૃતિં બલિષ્ઠામ્ ।
ત્વામેવ ધીરાઃ પુરુષં વિશન્તિ તેષાં શ્રમઃ સ્યાન્ન તુ સેવયા તે ॥ ૯॥

તત્તે વયં લોકસિસૃક્ષયાદ્ય ત્વયાનુસૃષ્ટાસ્ત્રિભિરાત્મભિઃ સ્મ ।
સર્વે વિયુક્તાઃ સ્વવિહારતન્ત્રં ન શક્નુમસ્તત્પ્રતિહર્તવે તે ॥ ૧૦॥

યાવદ્બલિં તેઽજ હરામ કાલે યથા વયં ચાન્નમદામ યત્ર ।
યથોભયેષાં ત ઇમે હિ લોકા બલિં હરન્તોઽન્નમદન્ત્યનૂહાઃ ॥ ૧૧॥

ત્વં નઃ સુરાણામસિ સાન્વયાનાં કૂટસ્થ આદ્યઃ પુરુષઃ પુરાણઃ ।
ત્વં દેવશક્ત્યાં ગુણકર્મયોનૌ રેતસ્ત્વજાયાં કવિમાદધેઽજઃ ॥ ૧૨॥

તતો વયં સત્પ્રમુખા યદર્થે બભૂવિમાત્મન્કરવામ કિં તે ।
ત્વં નઃ સ્વચક્ષુઃ પરિદેહિ શક્ત્યા દેવક્રિયાર્થે યદનુગ્રહાણામ્ ॥ ૧૩ ॥

ઇતિ શ્રીમદ્ભાગવતપુરાણાન્તર્ગતં કૂર્મસ્તોત્રં સમાપ્તમ્ ॥

From Bhagavatapurana, 3.05.38-3.05.50
Proofread by Dinesh Agarwal dinesh.garghouse at gmail.com, NA

.. kUrmastotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*